अङ्गुलिमुद्रा, स्त्री, (अङ्गुलेः मुदं लक्षणया धारयितु-र्हर्षं राति ददाति या अङ्गुलिमुद् + रा + कर्त्तरि कः) साक्षरोर्म्मिका। प्रभुनाम्ना स्वनाम्ना वा च-ङ्कितमङ्गुरीयकं। छापेर आङ्गुटी मोहरखोदा आङ्गुटी इति भाषा। इत्यमरः॥

अङ्गुलिमुद्रिका, स्त्री, (अङ्गुलिमुद्रा + स्वार्थे कः) अङ्गुलिमुद्रा। इत्यमरटीकायां रमानाथः॥

अङ्गुलिमोटनं, क्ली, (अङ्गुल्योर्म्मोटनं मर्द्दनं यस्मिन् तत् बहुव्रीहिः) अङ्गुलिद्वयमर्द्दनजातशब्दः। आ-ङ्गुलमट्कान इति भाषा। तत्पर्य्यायः। चुटकी २। इति त्रिकाण्डशेषः। सच्छटी ३ अङ्गुलिसन्देशः ४। इति हारावली॥ मुचुटी ५। इति जटाधरः॥ मुचुटीतु मुष्टिपर्य्याये हेमचन्द्रेण लिखिता।

अङ्गुलिसन्देशः, पुं, (अङ्गुल्या अङ्गुलिध्वनिना सन्देशः मोटनं षष्ठीतत्पुरुषः सम् + दिश् + भावे घञ्) अङ्गुलिमोटनं। इति हारावली॥

अङ्गुली, स्त्री, (अङ्ग + उलिच् स्त्रियां वा ङीप् पक्षे अङ्गुलिः) शरीरावयवविशेषः। आङ्गुल इति भाषा। (रामायणे,—

"कनिष्ठायामप्यङ्गुल्यां भ्रातुर्मम स राक्षसः॥

ज्वालाङ्गुलीभिर्भगवान् विश्वभ्यः स हुताशनः"॥)

तत्पर्य्यायः। करशाखा २। इत्यमरः॥ (अङ्गुलिः ३ अङ्गुरिः ४ अङ्गुरी ५ अङ्गुलः ६।) इति तट्टीका॥ सा क्रमेण पञ्चधा, यथा—अङ्गुष्ठः १ तर्ज्जनी २ मध्यमा ३ अनामिका ४ कनिष्ठा ५ इत्यमर-जटाधरौ॥ हस्तिशुण्डायां। इति मेदिनी॥

अङ्गुलीकः, पुं, क्ली, (अङ्गुल्यां कायते निधीयते-ऽसौ अङ्गुली + कै + घञर्थे कर्म्मणि कः) अङ्गु-लीयकं। इति त्रिकाण्डशेषः॥

अङ्गुलीपञ्चकं, क्ली, (पञ्चानामङ्गुलीनां समाहारः द्विगुसमासः राजदन्तादित्वात् पञ्चशब्दस्य पर-निपातः) हस्तस्य पञ्चाङ्गुलानि यथा,—अङ्गुष्ठः १ प्रदेशिनी २ मध्यमा ३ अनामिका ४ कनिष्ठिका ५। इति राजनिर्घण्टः॥

अङ्गुलीयः, पुं, क्ली, (अङ्गुल्या अयं तत्र भवो वा अङ्गुली + छ तस्य ईयः) अङ्गुलीयकं। इत्यमरटीका॥

अङ्गुलीयकं, क्ली पुं, (अङ्गुलीय + स्वार्थे कः) अ-ङ्गुलिभूषणं। आङ्गुटी इति भाषा। तत्पर्य्यायः। ऊर्म्मिका २। इत्यमरः॥ अङ्गुरीयकं ३ अङ्गु-रीयः ४ अङ्गुलीयः ५। इति तट्टीका॥ करा-रोटः ६ अङ्गुलीकः ७। इति त्रिकाण्डशेषः॥ पुंसि प्रमाणं। अयं मैथिल्यभिज्ञानं काकुत्स्थस्या-ङ्गुरीयकः। इति भट्टिः॥

अङ्गुलीसम्भूतः, पुं, (अङ्गुल्यां सम्भूतः जातः सप्तमी-तत्पुरुषः) नखः। इति राजनिर्घण्टः॥

अङ्गुष्ठः, पुं, (अङ्गौ हस्ते मुख्यत्वेन तिष्ठति यः अङ्गु + कर्त्तरि कः अम्बाम्बगोभू इत्यादिना षत्वम्) वृद्धाङ्गुलिः। इत्यमरः। बुड़ो आङ्गुल इति भाषा। (मनुः,—

"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते"।)

अङ्गूषः, पुं, (अङ्गति गच्छति अगि + ऊषन्) नकुलः। वाणः। इत्युणादिकोषः॥

अङ्घः, [स्] क्ली, (अङ्घते दुर्गतिं गच्छत्यनेन अघि + सर्व्वधातुभ्योऽसुन् इति असुन्) अंहः। पापं। इत्युणादिकोषः॥ (सूर्य्यशतके,—

"विदधतु घृणयः शीघ्रमङ्घोविघातं"।)

अङ्घिः, पुं, (अङ्घते गच्छत्यनेन अघि + करणे इक्) अङ्घ्रिः। इति विश्वः॥

अङ्घ्रिः, पुं, (अङ्घते गच्छत्यनेन अघि + करणे रिः) पादः। (सूर्य्यशतके,—"शीर्णघ्राणाङ्घ्रिपाणीन्"।) वृक्षमूलं। इति त्रिकाण्डशेषः॥

अङ्घ्रिनाम, [न्] क्ली, (अङ्घ्रिरूपेण नमते जलाद्या-कर्षणेन कल्पते यत् अङ्घ्रि + नम् + अन् णिच) वृक्षमूलं। इति हेमचन्द्रः॥

अङ्घ्रिनामकः, पुं, (अङ्घ्रिनाम + स्वार्थे कः) वृक्ष-मूलं। इत्यमरः॥

अङ्घ्रिपः, पुं, (अङ्घ्रिणा पिबति अङ्घ्रि + पा + ड) वृक्षः। इति हेमचन्द्रः॥

अङ्घ्रिपर्णी, स्त्री, (अङ्घ्रिवत् पर्णं पत्रं यस्याः सा बहुव्रीहिः स्त्रियां ङीप्) पृश्निपर्णी। चाकुलिया इति ख्याता। इत्यमरटीकायां रमानाथः॥

अङ्घ्रिवल्लिका, स्त्री, (अङ्घ्रिवत् वल्लिः उपमिति-कर्म्मधारयः। स्वार्थे कः)चित्रपर्णीवृक्षः। चाकुलिया इति भाषा। इत्यमरः॥ अस्या रूपान्तरं अङ्घ्रि-वल्लिः अङ्घ्रिवल्ली॥

अच इ पूजायां। इति कविकल्पद्रुमः॥ इ अ-ञ्चते। अञ्चु गतिपूजनयोरिति पूजार्थो यः स एवायं। इदित् पाठः पूजायां नलोपाभावात्। उदनुबन्धाभावश्च क्षुधवसपजार्थाच्चेत्यादिना क्ता-प्रत्ययस्य निष्ठायाश्च नित्येड्विधानात्। इति दुर्गा-दासः॥

अच इ ञ गतौ। श्लिष्टोक्तौ। इति कविकल्प-द्रुमः॥ इ अञ्चते। ञ अञ्चति अञ्चते। इति दुर्गादासः॥

अच उ ञ गतौ श्लिष्टोक्तौ। इति कविकल्प-द्रुमः॥ अचति अचते। उ अचित्वा (उदितो वा इतीड्भावपक्षे) अक्त्वा। श्लिष्टोक्तिरथ्यक्त-शब्दः। इति दुर्गादासः॥

अचण्डी, स्त्री, (चड़ि कोपने पचाद्यच् इदित्त्वात् नुम् स्त्रियां ङीप् न चण्डी नञ्समासः) सुशीला गौः। शान्त गाइ इति भाषा। तत्पर्य्यायः सुकरा २। इत्यमरः॥ अकोपना स्त्री॥

अचलः, पुं, (चलति यः चल् + पचाद्यच् न चलः नञ्समासः) पर्व्वतः। (रामायणे,—

"आससाद ततो रामं स्थितं शैलमिवाचलं"।)

कीलकः। इति मेदिनी॥ अकम्पे त्रि॥ (ध्रुवः, स्थिरः। यदुक्तं,—

"न स्वरूपात् न सामर्थ्यात्

नच ज्ञानादिकात् गुणात्।

चलनं विद्यते यस्य-

त्यचलः कीर्त्तितोऽच्युतः"॥

अविकारी, कूटस्थः)।

अचलकीला, स्त्री, (अचलः सुमेरुपर्व्वतः कीलः स्तम्भस्वरूपो यस्याः सा बहुव्रीहिः। कीलो लेशे द्वयोः स्तम्भ इति मेदिनी) पृथिवी। इति शब्दरत्नावली॥

अचलत्विट्, [ष्] पुं, (अचला स्थिरा त्विट् यस्य सः बहुव्रीहिः) कोकिलः। इति शब्दचन्द्रिका॥

अचलभ्राता, [तृ] पुं, बौद्धगणाधिपविशेषः। स तु शेषजैनाचार्य्यस्य एकादशशिष्यान्तर्गतः। इति हेमचन्द्रः॥

अचला, स्त्री, (न चला नञ्समासः) पृथिवी। इति मेदिनी॥ यथा रामायणे,—

"पृथिवीमपि कामं त्वं ससागरवनाचलां"।

अचिरद्युतिः, स्त्री, (अचिरा क्षणस्थायिनी द्युतिः कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति त्रि-काण्डशेषः॥

अचिरप्रभा, स्त्री, (अचिरा क्षणस्थायिनी प्रभा कान्तिर्यस्याः सा बहुव्रीहिः) विद्युत्। इति हेम-चन्द्रः॥

अचिररोचिः, [स्] स्त्री, (अचिरा रोचिः कान्ति-र्यस्याः सा बहुव्रीहिः) विद्युत्। इति जटाधरः॥

अचिरा, स्त्री, (अचिं ज्ञानोपदेशं राति ददाति या अचि + रा + कर्त्तरि क उपपदसमासः अच् + भावे इक्) अर्हतां मातृविशेषः। इति हेम-चन्द्रः॥

अचिरांशुः, स्त्री, (अचिराः क्षणस्थायिनः अंशवः किरणा प्रभाः यस्याः सा बहुव्रीहिः।) विद्युत्। इति हलायुधः॥ अचिरात् व्य अचिरं। शीघ्रं। अविलम्बं। यथा,—

"अचिरादुपकर्त्तुराचरे-

दथवात्मौपयिकीमुपक्रियां"।

इति नैषधं॥

अचिराभा, स्त्री, (अचिरा क्षणस्थायिनी आभा दी-प्तिर्यस्याःसा बहुव्रीहिः)विद्युत्। इति हारावली॥

अचेतनः, त्रि, (नास्ति चेतना ज्ञानं यस्य स बहु-व्रीहिः) चेतनारहितः। चैतन्यशून्यः। अज्ञानः। यथा,—

"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु"।

इति मेघदूतकाव्यं॥ सेन्द्रियं चेतनं द्रव्यं निरि-न्द्रियमचेतनं। इति चरकः॥

अचैतन्यं, क्ली, (न चैतन्यं चेतना नञ्तत्पुरुषः) निश्चेतना। चेतनाभावः। अज्ञानं। यथा,—

"अचैतन्यमिदं विश्वं चैतन्यं देवमेव यत्।

न जानन्त्यपि शास्त्रज्ञा भ्रमन्त्येव हि केवलं"॥

इति चैतन्यचन्द्रामृतं॥ तद्वति त्रि॥

अच्छं, व्य, (न छ्यति सम्मुखत्वात् दृष्टिं नाच्छ्यति न छो + घञर्थे कः नञ्तत्पुरुषः) आभिमुख्यं। साम्मुख्यं। इति मेदिनी॥

अच्छः, त्रि, (न छ्यति निर्म्मलत्वात् दृष्टिं नाच्छ्यति नञ् + छो + कर्त्तरि कः उपपदसमासः) स्वच्छः। निर्म्मलः। इत्यमरः॥ (अमरुशतके, अच्छकपोल-मूलगलितैः)।

अच्छः, पुं, (न छ्यति निर्म्मलत्वात् दृष्टिं नाच्छ्यति न + छो + कर्त्तरि कः उपपदसमासः) स्फटिकः। भालूकः। इति मेदिनी॥